प्रशस्तम् । आदिदण्डस्तथैको भृगुकुलन्दपतेः सर्वकार्य्ये हि शस्तो दण्डाश्चत्वार एव क्वचिदपि समये नैव शौरेः प्रशस्ताः । प्रतिदण्डं फलान्येषां ज्ञात्वा वाच्यं कचिच्छुभम् । रवौ च वेदा, वसवः सुधांशौ, कुजे च बाणाः शशिजे तथाङ्काः । शनाष्टतु,दिक् च बृहस्पतौ स्याद्राहौ तुरङ्गा भृगुजे च रुद्राः । अशुभे दण्डसंयोगे सर्वत्र पुण्यवर्जिते । बालस्य मरणं शीघ्रं यदि पापैः समन्वितम् । अशुभग्रहदण्डे तु सर्वत्र पापवर्जिते । बालस्य कुशलं सर्वं शुभैर्यदि समन्वितम् । अशुभो दण्डनाथो हि वेधश्चेत्तेन लभ्यते । मरणं तत्र वक्तव्यं बालस्य नान्यथा भवेत् । पापस्य दण्डमात्रे तु तद्वयोगवेधवर्जिते । बालस्य कुशलं तत्र शुभैर्यदि समन्वितम्" । वर्षपताकी तु केतुपताकाशब्दे २२२६पृ० उक्तः तत्र दृश्यः

**पतापत** त्रि० पत–यङ्लुक्–अच् नि०। अतिशयपतनयुक्ते

**पति** पु० पा–डति । १भर्त्तरि २स्वामिनि च तत्स्त्रियां "पत्युर्नो यज्ञसम्बन्धे" पा० न ङीप् च पत्नी । पतिकृतयज्ञफलभागिन्याम् स्त्रियां "विभाषा सपूर्वस्य" पा० गृहस्य पतिः गृहपतिः गृहपत्नी वा । बहुव्रीहावपि शूद्रः पतिर्यस्याः शूद्रपत्नी शूद्रपतिः । पतिशब्दस्य समास एव घिसंज्ञा श्रीपतये श्रीपतेः इत्यादि असमासे तु न घिसंज्ञा पत्या पत्ये इत्यादि आर्षे क्वचित् असमासेऽपि घित्वम् "क्लीवे वा पतीते पतौ" पराशरः "सीतायाः पतये नमः" इत्यादि पतिसेवनप्रकारादिकं यथा

"व्यर्थं व्रतादिकं तस्या या भर्त्तुश्चापकारिणी । तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत् । भर्तुरप्रियकारिण्याः सर्वं भवति निष्फलम् । यया प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया । पतिव्रताव्रतार्थञ्च पतिरूपी हरिः स्वयम् । सर्वदानं सर्वयज्ञः सर्वतीर्थनिषेवणम् । सर्वं व्रतं तपः सर्वमुपवासादिकञ्च यत् । सर्वधर्मश्च सत्यञ्च सर्वदेवप्रपूजनम् । तत्सर्वं स्वामिसेवायाः कलां नार्हन्ति षोडशीम् । सुपुण्ये भारते वर्षे पतिसेवां करोति या । वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः शतम् । विप्रियं कुरुते भर्त्तुर्विप्रियं वदति प्रियम् । असत्कुलप्रजाता या तत्फलं श्रूयतां सति ! । कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ । ततो भवति चाण्डाली पतिपुत्रविवर्जिता" ब्रह्म० वै०प्र० ४२अ०। पतिसेवाप्रकारस्तु भा०व० २३२अ० द्रौपद्या सत्यभामां प्रति उक्तस्तत्र दृश्यः । अधिकम् उक्तं पतिव्रताशब्दे दृश्यम् ।

**पतिंवरा** स्त्री पतिं वृणोति वृ–खच् मुम् । १स्वयं पतिवरणकारिकायां कन्यायाम् स्वयंवरायाम् । २कृष्णजीरके शब्दच० ।

**पतिघातिनी** स्त्री पतिं हन्ति हन–णिनि ङ्तु० । पतिनाशिकायां स्त्रियां तत्सूचकयोगश्च कर्कटे लग्ने कर्कटे चन्द्रे वा सौरत्रिंशांशजनुमेति वृ० जा० उक्तं यथा "स्वच्छन्दा पतिघातिनी बहुगुणा शिल्पिन्यसाध्वीन्दुभे" मू० "इन्दुभे कर्कटे लग्ने तद्गते वा चन्द्रे भौमत्रिंशांशकजाता स्वच्छन्दा स्वैरिणी यटेष्टव्यवहारिणी भवति सौरत्रिंशांशकजाता पतिघातिनी भवति" भट्टोत्पलः ।

**पतिघ्न** त्रि० पतिं हन्ति हन–"लक्षणे जायापत्योष्टक्" पा० टक् । पतिनाशसूचके लक्षणभेदे स्त्रियां ङीप् । पतिघ्नी पाणिरेखा । विवाहात् प्राक् क्षेत्रादिमृत्पिण्डाष्टकस्य कुमार्य्यै परीक्षार्थं दाने श्मशानजातमृत्पिण्डस्य कुमार्य्या ग्रहणे तस्याः पतिहननफलमुक्तम् आश्व०गृ० १।५।६ "अष्टौ पिण्डान् कृत्वा पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति" इति नियोजिता कुमारी यदि श्मशानादाहृतां मृदं गृह्णाति तदा पतिघ्नीति विद्यात् तदुक्तं तत्रैव वृ० "श्मशानात् पतिघ्नीति" ।

**पतित** त्रि० पत–गत्यर्थत्वात् कर्त्तरि क्त सनि वेट्कत्वेऽपि पतेः पृथग्ग्रहणात् इट् पतधातौ पित्सतीत्येकरूपलिखनं प्रमादात् पक्षे पिपतिषतीति रूपान्तरं भवतीति बोध्यम् । १पतनकर्त्तरि २नरकगमनसूचककर्मविशेषकारके स च कर्मविशेषः पतितलक्षणविषया प्रा०वि० निर्णीतो यथा

गोतमः "ब्रह्महा सुरापः गुरुतल्पगः मातृपितृयोनिसम्बन्धागस्तेननास्तिकनिन्दितकर्माभ्यासी पतितात्याग्यपतितत्यागिनश्च पतिताः पातकसंयोजकाश्च तैश्चाब्दं समाचरन्निति" । पातकसंयोजकाः सुरापानादौ परान् प्रयोजयन्ति । इत्युपक्रमे सामान्यशास्त्रस्यापि विशेषशक्तिर्भविष्यति मृगादिपदस्येव पशौ, हारीतेन विशेषगणने पाठात् । तथा च्यवनः "अथ पातकोपपातकमहापातकानि व्याख्यास्यामः इति । तथा च पठन्ति "महापातकतुल्यानि पापान्युक्तानि यानि च । तानि पातकसंज्ञानि तदूनमुपपातकम्" । अतो महापातकतुल्यपापविशेषेऽप्यस्य शक्तिः । पतनशब्दार्थमाह गोतमः "द्विजातिकर्मभ्यो हानिः पतनं परत्र चासिद्धिस्तमेके नर-